लकुचः । इति राजनिर्घण्टः ॥ स्वल्पकण्टाफलश्च ।
(पर्य्यायोऽस्य यथा,—
"लकुचः क्षुद्रपनसो लकुचो डहु इत्यपि" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षुद्रपर्णः, पुं, (क्षुद्रं पर्णं पत्रं यस्य ।) अर्ज्जकः । इति राजनिर्घण्टः ॥ सूक्ष्मपत्रे त्रि ॥ (विवरणमस्यार्ज्जकशब्दे ज्ञातव्यम् ॥)

क्षुद्रपाषाणभेदा, स्त्री, (क्षुद्रा पाषाणभेदा इति नित्यकर्म्मधारयः ।) क्षुपविशेषः । क्षुद्रपाषाणभेदी इति ख्याता । तत्पर्य्यायः । चतुःपत्री २ पार्व्वती ३ नगभूः ४ अश्मकेतुः ५ गिरिभूः ६ कन्दरोद्भवा ७ शैलोद्भवा ८ गिरिजा ९ नगजा १० । अस्या गुणाः । व्रणकृच्छ्राश्मरीहरत्वम् । इति राजनिर्घण्टः ॥

क्षुद्रपिप्पली, स्त्री, (क्षुद्रा पिप्पली ।) वनपिप्पली । इति राजनिर्घण्टः ॥

क्षुद्रपोतिका, स्त्री,(क्षुद्रा पोतिका । नित्यकर्म्मधारयः ।) मूलपोती । इति राजनिर्घण्टः ॥

क्षुद्रफलकः, पुं, (क्षुद्रं फलमस्य इति कप् ।) जीवनवृक्षः । इति शब्दचन्द्रिका ॥

क्षुद्रफला, स्त्री, (क्षुद्रं फलं अस्या इति टाप् ।) भूमिजम्बुः । इति शब्दमाला । इन्द्रवारुणी । गोपालकर्कटी । कण्टकारी । अग्निदमनी । इति राजनिर्घण्टः ॥

क्षुद्रबुद्धिः, त्रि, (क्षुद्रा अल्पा अधमा क्रूरा वा बुद्धिर्मतिर्यस्य ।) अल्पमतिः । क्रूरधीः । अधमचेतनः ।

क्षुद्रमुस्ता, स्त्री, (क्षुद्रा मुस्ता इति कर्म्मधारयः ।) कसेरुः । इति राजनिर्घण्टः ॥ (कसेरुशब्देऽस्या गुणपर्य्याया ज्ञेयाः ॥)

क्षुद्ररोगः, पुं, (क्षुद्रः रोगः ।) स्वल्पव्याधिः । तस्य गणना यथा । पलितः १ इन्द्रलुप्तः २ दारुणकः ३ अरुंषिका ४ इरिवेल्लिका ५ पनसिका ६ पाषाणगर्द्दभः ७ मुखदूषिका ८ व्यङ्गः ९ नीलिका १० वल्मीकः ११ कच्छा १२ गन्धिनाम १३ अग्निरोहिणी १४ विदारिका १५ चिप्पः १६ परिवर्त्तिका १७ अवपाटिका १८ निरुद्धप्रकाशः १९ सन्निरुद्धगुदः २० वृषणकच्छः २१ अहिपूतनः २२ गुदभ्रंशः २३ शूकरदंष्ट्रः २४ अनुशयी २५ अलसः २६ दारी २७ कदरः २८ तिलकालकः २९ मसकः ३० जतुमणिः ३१ न्यच्छः ३२ पद्मिनीकण्टकम् ३३ अजगल्लिका ३४ यवप्रख्या ३५ अन्त्रालजी ३६ विवृता ३७ इन्द्रवृद्धा ३८ गर्द्दभिका ३९ जालगर्द्दभः ४० कच्छपी ४१ शर्कराऽर्बुदः ४२ । एषां मध्ये येषां लक्षणचिकित्सा पूर्व्वं न लिखिता ते चात्र लिख्यन्ते ॥ * ॥

अथ अरुंषिकालक्षणमाह ।
"अरुंषि बहुवक्त्राणि बहुक्लेदीनि मूर्द्धनि ।
कफासृक्कृमिकोपेन तानि विद्यादरुंषिकाम्" ।
अरुंषि व्रणानि । अथारुंषिकायाश्चिकित्सा ।
"नीलोत्पलस्य किञ्जल्को धात्रीफलसमन्वितः ॥
यष्टीमधुकयुक्तश्च लेपाद्धन्यादरुंषिकाम् ।
त्रिफलाया रसो यष्टी मार्क्कवोत्पलसारिवा ।
सैन्धवं पक्वमेतैस्तु तैलं हन्यादरुंषिकाम्" ॥
इति त्रिफलाद्यं तैलम् ॥ * ॥

अथाग्निरोहिणीलक्षणमाह ।
"कक्षाभागेषु ये स्फोटा जायन्ते मांसदारुणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः ॥
सप्ताहात् द्वादशाहाद्वा पक्षाद्वा घ्नन्ति मानवम् ।
तामग्निरोहिणीं विद्यादसाध्यां सान्निपातिकाम्" ॥
सप्ताहादित्यादि वातपित्तकफाधिक्यापेक्षया बोद्धव्यम् । घ्नन्तीत्यनुपक्रान्ताः । उपक्रान्तास्तु साध्या एव । चरकेणाग्निरोहिण्याश्चिकित्साया उक्तत्वात् ।

तस्याश्चिकित्सा ।
"पित्तं वीसर्पविधिना साधयेदग्निरोहिणीम् ।
रोहिण्यां लङ्घनं कुर्य्याद्रक्तमोक्षणरूक्षताम् ॥
शरीरस्य च संशुद्धिं तान्तु वृद्धां परित्यजेत्" ॥ * ॥

अथ विदारिकालक्षणमाह ।
"विदारिकन्दवद्वृत्तो कक्षावङ्क्षणसन्धिषु ।
रक्तो विदारिकां विद्यात् सर्व्वजां सर्व्वलक्षणाम्" ॥
अत्र पिड़कामिति विशेष्यपदमध्याहरणीयम् ॥

अथ तच्चिकित्सा ।
"विदारिकायां प्रथमं जलौकायोजनं हितम् ।
पाटनञ्च विपक्वायां ततो व्रणविधिः स्मृतः" ॥ * ॥

अथावपाटिकालक्षणमाह ।
"अल्पीयसीं यदा हर्षात् बलाद्गच्छेत् स्त्रियं नरः ।
हस्ताभिघातादथवा चर्म्मण्युद्वर्त्तिते बलात् ॥
मर्द्दनात् पीड़नाद्वापि शुक्रवेगविघाततः ।
यस्यावपाट्यते चर्म्म तां विद्यादवपाटिकाम् ॥
वातेन कर्कशा रूक्षा सूक्ष्मा श्यावा रुगन्विता ।
पित्तेन पीता रक्ता वा दाहव्यासमन्विता ॥
श्लेष्मणा कठिना स्निग्धा कण्डुमत्यल्पवेदना" ॥
अल्पीयः अल्पतरं योनिच्छिद्रं यस्यास्ताम् ।
अवपाट्यते विदार्य्यते ।

अथ तस्याश्चिकित्सा ।
"स्नेहस्वेदैरिमां वैद्यश्चिकित्सेदवपाटिकाम्" ।

अथ सन्निरुद्धगुदस्य लक्षणमाह ।
"वेगसन्धारणाद्वायुर्विहतो गुदसंश्रितः ।
निरुणद्धि महास्रोतः सूक्ष्मं द्वारं करोति हि ॥
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति ।
सन्निरुद्धगुदं व्याधिमेतं विद्यात् सुदुस्तरम्" ॥

अथ तस्य चिकित्सा ।
"सन्निरुद्धगुदे तैलैः सेको वातहरैर्हितः ।
तथा निरुद्धप्रकाशक्रियापि कथिता हिता" ॥

अथाजगल्लिकालक्षणमाह ।
"स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका" ॥
ग्रथिता गुम्फितेव । मुद्गसन्निभा मुद्गाकृतिः ।

अथ तस्याश्चिकित्सा ।
"तत्राजगल्लिकामामां जलौकोभिरुपाचरेत् ।
शुक्तिसौराष्ट्रिकाक्षारकल्कैश्चालेपयेन्मुहुः ॥
कठिना क्षारयोगैश्च द्रावयेदजगल्लिकाम् ।
श्यामालाङ्गलिकामूर्व्वाकल्कैरपि विलेपयेत् ॥
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत्" ॥

अथान्त्रालजीलक्षणमाह ।
"घनामवक्त्रां पिड़कामुन्नतां परिमण्डलाम् ।
अन्त्रालजीमल्पपूयां तां विद्यात् कफवातजाम्" ॥
घनां कठिनाम् । परिमण्डलां वर्त्तुलाम् । अल्पपूयां स्वल्पस्रावाम् ॥

अथ तस्याश्चिकित्सा ।
"अन्त्रालजीं यवप्रख्यां पूर्व्वं स्वेदैरुपाचरेत् ।
मनःशिलादेवदारुकुष्ठकल्कैः प्रलेपयेत् ॥
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत्" ॥
इति भावप्रकाशे क्षुद्ररोगाधिकारः ॥
(अस्य सकारणलक्षणसम्प्राप्तिचिकित्सितानि यथा,-
"स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।
पिटिका कफवाताभ्यां बालानामजगल्लिका ॥
यवप्रख्या यवप्रख्या ताभ्यां मांसाश्रिता घना ।
अवक्त्रा चालजी वृत्ता स्तोकपूया घनोन्नताः ॥
ग्रथयः पञ्च वा षड़् वा कच्छपी कच्छपोन्नता ।
कर्णस्योर्द्ध्वं समन्ताद्वा पिटिका कठिनोग्ररुक् ॥
शालूकाभा पनसिका शोफस्त्वल्परुजः स्थिरः ।
हनुसन्धिसमुद्भूतस्ताभ्यां पाषाणगर्द्दभः ॥
शाल्मलीकण्टकाकाराः पिटिकाः सरुजो घनाः ।
मेदोगर्भा मुखे यूनां ताभ्याञ्च मुखदूषिकाः ॥
ते पद्मकण्टका ज्ञेया यैः पद्ममिव कण्टकैः ।
चीयते नीरुजैः श्वेतैः शरीरं कफवातजैः ॥
पित्तेन पिटिका वृत्ता पक्वोदुम्बरसन्निभा ।
महादाहज्वरकरी विवृता विवृतानना ॥
गात्रेष्वन्तश्च वक्त्रस्य दाहज्वररुजान्विताः ।
मसूरमात्रास्तद्वर्णास्तत्संज्ञाः पिटिका घनाः ॥
ततः कष्टतराः स्फोटा विस्फोटाख्या महारुजाः ।
या पद्मकर्णिकाकारा पिटिका पिटिकान्विता ॥
सा विद्धा वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी ।
मण्डला विपुलोत्सन्ना सरागपिटिकाचिता ॥
कक्षेति कक्षासन्नेषु प्रायो देशेषु सानिलात् ।
पित्ताद्भवन्ति पिटिकाः सूक्ष्मा लाजोपमा घनाः ;
तादृशी महती त्वेका गन्धनामेति कीर्त्तिता ।
घर्म्मस्वेदपरीतेऽङ्गे पिटिकाः सरुजो घनाः ॥
राजिकावर्णसंस्थानप्रमाणा राजिकाह्वयाः ।
दोषैः पित्तोल्वणैर्मन्दैर्विसर्पति विसर्पवत् ॥
शोफोऽपाकस्तनुस्ताम्रो ज्वरकृज्जालगर्द्दभः ।
मलैः पित्तोल्वणैः स्फोटा ज्वरिणो मांसदारुणाः ॥
कक्षाभागेषु जायन्ते येऽग्न्याभाः साग्निरोहिणी ।
पञ्चाहात्सप्तरात्राद्वा पक्षाद्वा हन्ति जीवितम् ॥
त्रिलिङ्गा पिटिका वृत्ता जत्रूर्द्ध्वमिरिवेल्लिका ।
विदारी कन्दकठिना विदारी कक्षवङ्क्षणे ॥
मेदोऽनिलकफैर्ग्रन्थिः स्नायुमांसशिराश्रयैः ।
भिन्नो वसाज्यमध्वाभं स्रवेत्तत्रोल्वणोऽनिलः ॥
मांसं विशोष्य ग्रथितां शर्करामुपपादयेत् ॥
दुर्गन्धं रुधिरं क्लिन्नं नानावर्णं ततो मलाः ॥
तां स्रावयन्ति निचितां विन्द्यात्तच्छर्कराऽर्बुदम् ।
पाणिपादतले सन्धौ जत्रूर्द्ध्वं वोपचीयते ॥
वल्मीकवच्छनैर्ग्रन्थिस्तद्वत् सूक्ष्मैर्मुखैः ।
रुग्दाहकण्डूक्लेदाढ्यो वल्मीकोऽसौ समस्तजः ॥
शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः ।